## अष्टमाध्यायस्य

## चतुर्थः पादः

### रषाभ्यां नो णः समानपदे । (१/२३८)

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेन् निमित्तनिमित्तिनौ भवतः। आस्तीर्णम् । [1]विशीर्णम् । अवगूर्णम् । षकारात् – कुष्णाति । [2]पुष्णाति । [3]मुष्णाति । षग्रहणमुत्तरार्थम्, ष्टुत्वेनैव [4]हि सिद्धमेतत् । समानपदे इति किम् ? अग्निर्नयति । वायुर्नयति ।

[९४६] ऋवर्णाच्चेति वक्तव्यम् । (म.भा. ३.४५२)

तिसृणाम् । चतसृणाम् । मातृणाम् । पितृणाम् । रश्रुतिसामान्यनिर्देशात् वा सिद्धम् । [5]अवर्णभक्त्या च व्यवधानेऽपि [6]णत्वं भवति इति क्षुभ्नादिषु (८.४.३९/७९२) नृनमनतृप्नोतिग्रहणं ज्ञापकम् । अथवा ऋवर्णादपि णत्वं भवति इति [7]एतदेवानेन ज्ञाप्यते ॥

### अट्कुप्वाङ्नुम्व्यवायेऽपि । (२/१९७)

अट् कु पु आङ नुम् इत्येतैर्व्यवाये[8]ऽपि रेफषकाराभ्यामुत्तरस्य नकारस्य [9]णकार आदेशो भवति । अड्व्यवाये तावत् – करणम् । हरणम् । किरिणा । गिरिणा । कुरुणा । गुरुणा । कवर्गव्यवाये – अर्केण । मूर्खेण । [10]गर्गेण । अर्घेण । पवर्गव्यवाये – दर्पेण । रेफेण । [11]गर्भेण । [12]चर्मणा । वर्मणा । आङव्यवाये – पर्याणद्धम् । [13]निराणद्धम् । अड्व्यवाये इति सिद्धे आङग्रहणं पदव्यवाये (८.४.३८/१०५७) इत्यस्य प्रतिषेधस्य बाधनार्थम् । नुम्व्यवाये – बृंहणम् । बृंहणीयम् । नुम्ग्रहणमनुस्वारोपलक्षणार्थं द्रष्टव्यम् । तेन तृंहणम्, तृंहणीयम् [14]इत्यत्र अनुस्वारव्यवाये [15]नुमभावेऽपि णत्वं भवति । [16]सत्यपि च नुमि यत्रानुस्वारो न श्रूयते तत्र न भवति, प्रेन्वनम्, प्रेन्वनीयम् इति । [17]व्यवायोपलक्षणार्थत्वादडादीनामिह [18]व्यस्तैः समस्तैर्व्यवायेऽपि णत्वं भवति ॥

### पूर्वपदात् सञ्ज्ञायामगः । (३/८८७)

पूर्वपदस्थान् निमित्तादुत्तरस्य [19]गकारवर्जिताद् नकारस्य णकार आदेशो भवति सञ्ज्ञायां विषये । द्रुणसः । [20]वार्ध्रीणसः । [21]खरणसः । शूर्पणखा । सञ्ज्ञायाम् इति किम् ? चर्मनासिकः । अगः इति किम् ?

---

1. विकीर्णम् इत्यधिकम् क.इ. 2. पुष्णाति नास्ति ब. 3. मुष्णाति नास्ति इ.ह. 4. हि नास्ति इ. 5. वर्णभक्त्या क, ऋवर्णभक्त्या इ. 6. णत्वं नास्ति क. 7. एतदेव तेन ब, एतदेव ज्ञाप्यते क, एतदेव ज्ञापकम् ह. 8. अव्यवाये इत्यधिकम् क. 9. णकारादेशः ब.इ. 10. सर्गेण इ, वर्गेण ह. 11. दर्भेण ब.इ. 12. कर्मणा इ. 13. निराणद्धम् नास्ति क. 14. अत्र नास्ति क. 15. नुमभावे नास्ति इ. 16. अनुस्वाराभावे तु सत्यपि च नुमि न भवति ब.क.इ. 17. अम् इत्यधिकम् क. 18. व्यस्तैः नास्ति ब, व्यस्तानां समस्तानां च ग्रहणम् क, तैः व्यस्तैः इ. ह. 19. अगारकारादुत्तरस्य ब. इ. ह. 20. वाध्रीणसः ब. क, नास्ति इ. ह. 21. खरणसः नास्ति ब.